# ॥ श्री सांब सदाशिव अक्षरमाला ॥

अथ श्री सांब सदाशिव अक्षरमालास्तवः
सांब सदाशिव सांब सदाशिव ।
सांब सदाशिव सांब शिव ॥
अद्भुतविग्रह अमराधीश्वर
अगणित गुणगण अमृत शिव - हर - सांब
आनन्दामृत आश्रितरक्षक
आत्मानन्द महेश शिव - हर - सांब
इन्दुकलादर इन्द्रादिप्रिय
सुन्दररूप सुरेश शिव - हर - सांब
ईश सुरेश महेश जनप्रिय
केशव सेवित कीर्ति शिव - हर - सांब
उरगादिप्रिय उरगविभूषण
नरकविनाश नतेश शिव - हर - सांब
ऊर्जितदान वनाश परात्पर
आर्जितपापविनाश शिव - हर - सांब
ऋग्वेदश्रुति मौलि विभूषण
रवि चन्द्राग्नित्रिनेत्र शिव - हर - सांब
ॠपनामादि प्रपञ्चविलक्षण
तापनिवारण तत्व शिव - हर - सांब
ऌल्लिस्वरूप सहस्रकरोत्तम
वागीश्वर वरदेश शिव - हर - सांब
ॡताधीश्वर रूपप्रिय हर
वेदान्तप्रिय वेद्य शिव - हर - सांब
एकानेक स्वरूप सदाशिव
भोगादिप्रिय पूर्ण शिव - हर - सांब
ऐश्वर्याश्रय चिन्मय चिद्घन
सच्चिदानन्द सुरेश शिव - हर - सांब
ओङ्कारप्रिय उरगविभूषण
ह्रींङ्कारप्रिय ईश शिव - हर - सांब
औरसलालित अन्तकनाशन
गौरिसमेत गिरीश शिव - हर - सांब
अंबरवास चिदंबर नायक

तुंबुरु नारद सेव्य शिव - हर - सांब
आहारप्रिय अष्त दिगीश्वर
योगिहृदि प्रियवास शिव - हर - सांब
कमलापूजित कैलासप्रिय
करुणासागर काशि शिव - हर - सांब
खड्गशूल मृग टङ्कधनुर्धर
विक्रमरूप विश्वेश शिव - हर - सांब
गंगा गिरिसुत वल्लभ शङ्कर
गणहित सर्वजनेश शिव - हर - सांब
घातकभंजन पातकनाशन
दीनजनप्रिय दीप्ति शिव - हर - सांब
ङान्तास्वरूपानन्द जनाश्रय
वेदस्वरूप वेद्य शिव - हर - सांब
चण्डविनाशन सकलजनप्रिय
मण्डलाधीश महेश शिव - हर - सांब
छत्रकिरीट सुकुण्डल शोभित
पुत्रप्रिय भुवनेश शिव - हर - सांब
जन्मजरा मृत्यादि विनाशन
कल्मषरहित काशि शिव - हर - सांब
झङ्कारप्रिय भृंगिरिटप्रिय
ओङ्कारेश्वर विश्वेश शिव - हर - सांब
ञानाञान विनाशन निर्मल
दीनजनप्रिय दीप्ति शिव - हर - सांब
टङ्कस्वरूप सहस्रकरोत्तम
वागीश्वर वरदेश शिव - हर - सांब
ठक्काद्यायुध सेवित सुरगण
लावण्यामृत लसित शिव - हर - सांब
डंभविनाशन डिण्डिमभूषण
अंबरवास चिदेक शिव - हर - सांब
ढंढंडमरुक धरणीनिश्चल
ढुंढिविनायक्क सेव्य शिव - हर - सांब
णाणामणिगण भूषणनिर्गुण
नतजनपूत सनाथ शिव - हर - सांब
तत्वमस्यादि वाक्यार्थ स्वरूप
नित्यस्वरूप निजेश शिव - हर - सांब
स्थावरजंगम भुवनविलक्षण

तापनिवारण तत्व शिव - हर - सांब
दन्तिविनाशन दळितमनोभव
चन्दन लेपित चरण शिव - हर - सांब
धरणीधरशुभ धवळविभासित
धनदादिप्रिय दान शिव - हर - सांब
नळिनविलोचन नटनमनोहर
अळिउलभूषण अमृत शिव - हर - सांब
पार्वतिनायक पन्नगभूषण
परमानन्द परेश शिव - हर - शांब
फालविलोचन भानुकोटिप्रभ
हालाहलधर अमृत शिव - हर - सांब
बन्धविमोचन बृहतीपावन
स्कन्दादिप्रिय कनक शिव - हर - सांब
भस्मविलेपन भवभयमोचन
विस्मयरूप विश्वेश शिव - हर - सांब
मन्मथनाशन मधुरानायक
मन्दरपर्वतवास शिव - हर - सांब
यतिजन हृदयाधिनिवास
विधिविष्ण्वादि सुरेश शिव - हर - सांब
लङ्काधीश्वर सुरगण सेवित
लावण्यामृत लसित शिव - हर - सांब
वरदाभयकर वासुकिभूषण
वनमालादि विभूष शिव - हर - सांब
शान्ति स्वरूपातिप्रिय सुन्दर
वागीश्वर वरदेश शिव - हर - सांब
षण्मुखजनक सुरेन्द्रमुनिप्रिय
षाड्गुण्यादि समेत शिव - हर - सांब
संसारार्णव नाशन शाश्वत
साधुजन प्रियवास शिव - हर - सांब
हरपुरुषोत्तम अद्वैतामृत
मुररिपुसेव्य मृदेश शिव - हर - सांब
लाळित भक्तजनेश निजेश्वर
काळिनटेश्वर काम शिव - हर - सांब
क्षररूपाभि प्रियान्वित सुन्दर साक्षात्
स्वामिन्नंबा समेत शिव - हर - सांब
सांब सदाशिव सांब सदाशिव

सांब सदाशिव सांब शिव

Encoded by Subramanian Ganesh sgesh@hotmail.com

Please send corrections to sanskrit@cheerful.com
Last updated November 22, 2000